॥ श्रीः ॥

॥ शुभमस्तु ॥

॥ श्रीमते हयग्रीवाय नमः ॥

अमूल्यमाल्यम्

प्रथमोऽङ्कः

कस्मै प्रथ्नासि राधे स्रजमतिमधुरां कालमेघाय नाके
    दूरे तस्य स्थितिर्हि प्रियतममनसा भक्तिभाजाऽर्पयामि ।
तुष्टः किन्ते ददाति प्रियममृतमिति स्मेरपङ्केरुहाक्ष्या
    प्रोक्तां सूक्तिं निशम्य प्रमदपरवशो यस्सजीयान्मुकुन्दः ॥ १ ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—(सानन्दं समन्ताद्विलोक्य)

नानानाटकनिर्माता यः कोविदमुदावहः ।
स एवास्यापि कर्ता हि जग्गूवकुलभूषणः ॥ २ ॥

अये ? किन्नु खलु मयि विज्ञापनैकताने शब्द इव पश्यामि तावत्, (परिक्रम्य) आम् ! ज्ञातम् । दधिभाण्डो नाम गोपवृद्धो निर्वेदेन किमपि प्रलपन्नास्ते ।

(निष्क्रान्तः)

(स्थापना)

(ततः प्रविशति निजगृहाजिरगतो लगुडहस्तो दधिभाण्डः)

दधिभाण्डः—(आत्मानं निर्वर्ण्य)—

असृङ्मांसवसामज्जापूर्णे जीर्णे मलाविले ।

शरीरेऽस्मिन्महत्प्रेम हन्त माया मुरद्विषः ॥३॥

(विचिन्त्य) भवतु, भवतु, यथा भगवतस्सङ्कल्पः !

(ऊर्ध्वमवलोक्य) निर्वर्तितदोहा गावः मार्तण्डोऽपि युगान्तरमधिरूढ. किन्तु खलु, अद्यापि बालका गोप्रचाराय नागताः। (कम्बलोष्णीषं भूमौ निधायोपविश्य) विलम्बेरन्पर्युषिताय, (उन्मत्त इव हसंस्ताम्बूलवीटिकां मुखे क्षिपन्) दिष्ट्या मे गोकुले जनिः, हन्त भोः, अद्यापि बहवो नन्दसूनुं मन्वते मनुष्यसाधारणम्। हन्त, माया, माया, (साट्टहासं) दामोदर, भो नवनीतचोर, ज्ञातोऽसि मया, हूं, भवतु, समयमनुपालयामि। यदा कदापि, मदायत्तो भविष्यसि किमु मुञ्चेयं, (सबाष्पं) हन्त, सौलभ्यं दामोदरस्य। (ससंभ्रमं प्रविश्य)

दामोदरः—तात, तात, (चालयति)

दधिभाण्डः—(सबाष्पं तूष्णीं सध्यानमास्ते)

दामोदरः—(मुखं निर्वर्ण्य) तात, कुतो रोदिषि ?

दधिभाण्डः—(सगद्गदं) बद्धोऽस्मीति।

दामोदरः—(सावेगं) केन ?

दधिभाण्डः—मायाजालेन।

दामोदरः—कस्य ?

दधिभाण्डः—भवतः।

दामोदरः—(सस्मितं) भवतु, भवतु, तात, (सानुनयं) अप्युपकरोषि ?

दधिभाण्डः—किमहम् ?

दामोदरः—(नवनीतपाणिं लिहन्) तात, सा वनमाला नाम गोपी मद्ग्रहणायानुयाति, क्वापि मां पिधेहि, उत्तिष्ठ।

दधिभाण्डः—(स्वगतं) भवतु, (प्रकाशं) न शक्नोम्युत्थातुम्।

दामोदरः—अहमुत्थापयामि। (तथा करोति)

दधिभाण्डः—(अभ्यन्तरं प्रविश्य) आयाहि, कृष्ण आयाहि।

दामोदरः—(उपसृत्य) क्व निलीये।

दधिभाण्डः—क्षिप्रमुपविश।

दामोदरः—ततः।

दधिभाण्डः—उपविशतु भवान्।

दामोदरः—(उपविशति)

दधिभाण्डः—(भाण्डं न्युब्जीकरोति)

सरभसं प्रविश्य (रज्जुहस्ता) **वनमाला**—बुड्ढ, एत्थ, आअदोसौ गोणीदचोळो (छाया—वृद्ध, अत्रागतस्स नवनीतचोरः ?)

दधिभाण्डः—अम्ब, किं तव गृहेपि लुण्ठितम्?

वनमाला—(२) अहइं त्थोकं वि णत्थि, किं भणिस्सं ससुरस्स? (रोदिति) (छाया—अथ किं स्तोकमपि नास्ति, किं भाणिष्यामि श्वशुराय?)

दधिभाण्डः—अत्र नायातः।

वनमाला—अवि सच्चम्। (छाया—अपि सत्यम्।)

दधिभाण्डः—अत्र कुतो वाम्ब, आयाति।

वनमाला—होदु ग्गहीदो हवे, सरिसं करिस्तं। (छाया—भवतु, गृहीतो भवेत् सदृशं करिष्यामि।)

दधिभाण्डः—सत्वेवं न गृह्यते, अम्ब

वनमाला—ता कहं (छाया—तर्हि कथं)

दधिभाण्डः—प्रीत्या समर्पय नवनीतम्।

वनमाला—(सभ्रूभङ्गं) हूं, समप्पेहि तस्स चोळस्स। (निष्क्रान्ता) (छाया—हूं समर्पय तस्मै चोराय।)

दामोदरः—(मन्दं) गता किमु?

दधिभाण्डः—अथ किं। (भाण्डोपर्युपविशति)

दामोदरः—तात, मोचय माम्।

दधिभाण्डः—मां मोचय।

दामोदरः—नहि बद्धस्त्वम्।

दधिभाण्डः—त्वं किल नैव बद्धः।

दामोदरः—तात, अलं परिहासेन, मोचय माम्।

दधिभाण्डः—दामोदर, अलं परिहासेन मां मोचय।

दामोदरः—भवन्तं कस्मान्मोचयामि।

दधिभाण्डः—भवन्तं कस्मान्मोचयामि।

दामोदरः—ननु कटाहादस्मात्।

दधिभाण्डः—मामप्यण्डकटाहादस्मात्।

दामोदरः—अलं, उक्तिप्रत्युक्तिकया, ननु, न मोचयसि?

दधिभाण्डः—यदि मोचयेन्माम्।

दामोदरः—तात, बद्धाञ्जलिरस्मि।

दधिभाण्डः—(सबाष्पगद्गदं) शान्तं पापं, सार्थय ममाञ्जलिं। (अञ्जलिं बध्नाति)

दामोदरः—तथास्तु।

दधिभाण्डः—अपि सत्यम्।

दामोदरः—सत्यं मुक्तोऽसि।

दधिभाण्डः—उद्धरामि भाण्डं दर्शय स्वरूपं।

दामोदरः—हन्त, ते हस्तागतोऽस्मि।

दधिभाण्डः—(साट्टहासतालं) किमु मुञ्चानि, दर्शयसि।

दामोदरः—तथास्तु।

दधिभाण्डः—(भाण्डमुत्थाप्य विलोक्य) हन्त, नास्ति कृष्णः, (सबाष्पाञ्जलिं) क्वासि दामोदर, देहि दीनाय दर्शनं,

कालियमर्दन क्वासि, (मन्दं तत्र तत्रान्विष्य) दामोदर, किमद्यापि वञ्चना? अङ्गीकुरु दधिभाण्डं, पश्य, अयं पयःकुम्भः। इदं ते नवनीतं, अभ्यन्तरादानीय सर्वमपि पुरो निक्षिप्य एहि कृष्ण, (सवैलक्ष्यं विलोक्य) किन्तु खलु—

चतुर्भुजधृतायुधं नवपयोदकान्तं स्फुरत्
किरीटमतुलप्रभं मधुरमन्दहासाननम्।
सुनूपुरमनोहरप्रयतभक्तभोग्याङ्घ्रिकं
कनत्कनकवाससं मधुरिपुं समीक्षे कृती ॥ ४ ॥

(सप्रदक्षिणं साष्टाङ्गं प्रणमति) (तच्छिरसस्तेजस्समुत्थाय कृष्णाङ्घ्रिं प्रविशति) (नेपथ्ये) जम्बूफलं, जम्बूफलं,

दामोदरः—अये, क्रेयमिव (निजरूपमासाद्य बहिरागत्य) आनय, आनय।

(शिरोनिहितजम्बूफलपिटका प्रविश्य) विक्रेत्री—(सभ्रूभङ्गं) हूं, तुमं खु कीणासि। (परिक्रामति) (छाया-हूं त्वं खलु क्रीणासि)

दामोदरः—(अनुधाव्य) क्रीणामि, निधेहि। (अर्गलीभवति)

विक्रेत्री—दंसेहि काअणिअं। (छाया—दर्शय काकणिकाम्)

दामोदरः—निधेहि, दर्शयामि।

विक्रेत्री—(पिटकं भूमौ निधायोपविश्य) दंसेहि। (छाया—दर्शय)

दामोदरः—देहि तावदेकं, पश्यामस्स्वादु वेति। (फलमाददाति)

विक्रेत्री—(सरोषमाच्छिद्य) तुमं खु गेह्णासि। (उत्तिष्ठति) (छाया—त्वं खलु गृह्णासि)

दामोदरः—तिष्ठ, तिष्ठ, (नेपथ्याभिमुखमवलोक्य) बाले, एहि तावत्; ददामि जम्बूफलं।

(सरभसं प्रविश्य) बाला—देहि। (हस्तं प्रसारयति)

दामोदरः—बाले, न ददाति तूष्णीमियं, ते कनकवलयमेकं प्रत्यर्प्य फलान्याददामः ।

बाला—हूं कुप्पेइ मह अम्बा । (छाया—हूं कुप्यति ममाम्बा)

दामोदरः—कथयाम्यहमम्बायै । (वलयमवमुच्य तस्यै दातुमुद्युङ्क्ते)

विक्रेत्री—(परितो विलोक्य वलयमादाय फलान्यर्पयित्वा सरभसं निष्क्रान्ता)

दामोदरः—(बालाया हस्तं फलैस्सम्पूर्य) गच्छ गृहं ।

बाला—तुमं वि आअच्छ, मह अंबा कुप्पेइ । (छाया—त्वमप्यागच्छ, ममाम्बा कुप्यति)

दामोदरः—(जम्बूफलं खादन्) गच्छ त्वं, अनुपदमागच्छामि । (निष्क्रान्तः)

बाला—अंबाए दंसइस्सं । (परिक्रामति) (छाया—अम्बायै दर्शयिष्यामि)

(ससम्भ्रमं कृष्णेण सह प्रविश्य) गोपी—(सदन्तपीडं) कहिं सा वळाई । (छाया—कुत्र सा वराकी)

दामोदरः—पश्य, इत एवागच्छति,

गोपी—(सत्वरमुपसृत्य) कहिं वळअं (संताड्य) केण गहीदं ? (छाया—कुत्र वलयं केन गृहीतम्)

बाला—(रुदती) णेण । (छाया—अनेन)

दामोदरः—न मया, दत्तमनयैव ।

गोपी—(कृष्णं गृहीत्वा) पिसुण, तुमं एव्व कदुअ बाळाए किदं त्ति भणासि । एहि तुह अंबाए कहइस्सं । (उभावप्याकर्षन्ती परिक्रामति) (छाया—पिशुन, त्वमेव कृत्वा बालया कृतमिति भणसि, एहि । तवाम्बायै कथयिष्यामि ।)

(ततः प्रविशति निजगृहोपविष्टा यशोदा)

यशोदा—(विलोक्य) किं वि किदं हवे वच्छेण । एसा उण पिसुणा

विअ दीसइ । (छाया--किमपि, कृतं भवेद्धत्सेन, एषा पुनः पिशुनेव दृश्यते)

गोपी--(उपसृत्य) पेक्ख, तुह पुत्तेण फळाकिदे इमाए वळअं दिण्णं । (छाया--पश्य तव पुत्रेण फलकृते अस्या वलयं दत्तम्) (बालाया हस्तं पुरः प्रसार्य विलोक्य च सवैलक्ष्यं) अह्मो, कणअमआइ फळाइ । (छाया--अहो कनकमयानि फलानि) (बालामादाय निष्क्रान्ता)

यशोदा--जाद, एव्वं ण करणिज्जं । (छाया--जात एवं न करणीयम्) (कृष्णमादाय चुम्बति)

दामोदरः--अम्ब, जम्बूफलं क्रीतं, पश्य मे जिह्वां । (दर्शयति)

यशोदा--किण्णु खु, तुह हिअए दहिभंडो विअ । (छाया--किन्नु खलु तव हृदये दधिभाण्ड इव)

(ससम्भ्रमं प्रविश्य) गोपाः--(सबाष्पं) अम्ब,

यशोदा--कुदो तुह्माणं ळोअणं बाहाउळं । (छाया--कुतो युष्माकं लोचनं बाष्पाकुलं ?)

गोपाः--दहिभण्डो माळिदो णेण । (छाया--दधिभाण्डो मारितोऽनेन)

यशोदा--कहं, सो बुड्ढो । (छाया--कथं ? स वृद्धः)

गोपाः--अहइं । (छाया--अथाकिं)

यशोदा--दामोदळ, किण्णु खु एदं । (छाया--दामोदर, किन्नु खल्वेतत्)

दामोदरः--(भयमभिनयन्) किं मया कृतं ?

गोपाः--(सक्रोधं हूं, किं मया कृतं करणिज्जं कदुअ किं मया कृतं, तुमं दाणिं तत्थ गदो णु । (छाया--करणीयं कृत्वा त्वमिदानीं तत्र गतो ननु)

दामोदरः--अम्ब, वनमालाया भीतोऽहं गतः ।

गोपाः--ताए भीदी कुदो ? (छाया--तस्या भीतिः कुतः)

(प्रविश्य) वनमाला—मह गेहे णोणीदं विलुंठिअ तस्स गेहं प्पविट्ठो, इमस्स एव्व तं कज्जं (छाया—मम गेहे नवनीतं विलुण्ठ्य तस्य गेहं प्रविष्टः (अस्यैव तत्कार्यम्)

दामोदरः—(रुदन्) न लुण्ठितमम्ब, दधिभाण्डोपि जीवति।

वनमाला—आम, लुंठिदं, दंसेहि दाव। (छाया—आम न लुण्ठितं दर्शय तावत्)

गोपाः—किं जीव इदंसेहि दाव। (छाया—किं जीवति दर्शय तावत्)

दामोदरः—गच्छन्तु भवन्तः, दर्शयामि।

सर्वे—हूं तुमं पुलदो गच्छ। (छाया—हूं त्वं पुरतो गच्छ)

दामोदरः—तथास्तु। (सर्वैरपि परिक्रम्य वनमालाया गृहं प्रविश्य) पश्यन्तु।

सर्वे—(द्विगुणतरं नवनीतं विलोक्य सवैलक्ष्यं तिष्ठन्ति)

(प्रविश्य) दधिभाण्डः—एवं किल वर्धते सर्वमप्यङ्गीकृतमनेन। (अन्तर्दधाति)

सर्वे—अचरिअं खु एदं, (साञ्जलिबन्धं) मरिसदु दामोदलो सावराहं इमं जामं। (परिक्रम्य निष्क्रान्ताः) (छाया—मृष्यतु दामोदरस्सापराधमिमं जनम्)

दामोदरः—(वेणुं वादयन्परिक्रामति) सादरं प्रविश्य निजगृहदेहलीमधिगम्य चिन्तयन्ती णमो भअवदो दामोदलस्स। (बद्धाञ्जलिस्तिष्ठति) (छाया—नमो भगवते दामोदराय)

(लगुडहस्तः प्रविश्य) वृद्धश्वशुरः—घरम्मि तुह णहि कज्जं तस्स जाळस्स मुळळीणादं सुणिअ प्पत्थिदासि दासीए पुत्तिआ खु तुमं। (लगुडेन ताडयति) (छाया—गृहे तव न हि कार्यं तस्य जारस्य मुरलीनादं श्रुत्वा प्रस्थितासि दास्याः पुत्रिका खलु त्वम्)

(प्रविश्य) वल्लभः—(सामर्षदन्तपीडं) गच्छ ळे दासीए पुत्ति अभ्यन्तलम्मि दहिमहणं वि उज्झिअ कहिं प्पत्थिदा। (केशपाशे

हस्तमाधाय चालयति) (छाया-गच्छ रे दास्याः पुत्रि, अभ्यन्तरे दधिमथनमप्युज्झित्वा कुत्र प्रस्थिता)

(चिन्तयन्ती—ध्याननिमीलिताक्षी तिष्ठति ।)

दामोदरः—(उपसृत्य) किमर्थमबलां पीडयतः ?

वृद्धः—अह्माणं घरस्स उत्तंतेण किं तुह गच्छ मग्गे। (छाया—अस्माकं, गृहस्य वृत्तान्तेन किं तव गच्छ मार्गे)

(चिन्तयन्ती—सहर्षं नेत्रमुन्मील्य सादरं दामोदरं पश्यति ।)

तरुणः—गोउळगदाओ इत्थिआओ तुए एव्व कुलटाओ । किदाओ—(छाया—गोकुलगतास्त्रियस्त्वयैव कुलटाः कृताः)

दामोदरः—(सस्मितं) किमेवं ?

तरुणः—(सक्रोधं) गच्छ तुह कज्जस्स । (कृष्णं नुदति) (छाया—गच्छ तव कार्याय)

चिन्तयन्ती—(सावेगं) हा, संत पावं । (नेत्रं निमीलयति) (छाया—हा, शान्तं पापं)

दामोदरः—तर्हि, ताडय, (परिक्रामति)

वृद्धः—गच्छ ळे अब्भंतळं । (नुदति) (छाया—गच्छ रे अभ्यन्तरं)

(चिन्तयन्ती—दण्डवत्पतति)

तरुणः—(सावेगं) किण्णु खु, ण हि णिस्ससइ । (छाया—किंनु खलु न हि निश्वसिति)

वृद्धः—वच्छ, पेक्ख पेक्ख, दामोदळं अणुगच्छइ । (छाया-वत्स, पश्य, पश्य, दामोदरमनुगच्छति)

तरुणः—कहं एत्थ एव्व णिवडिदा वट्टइ । दामोदळं अणुगच्छइ अ (छाया-कथं, अत्रैव निपतिता वर्तते दामोदरमनुगच्छति च)

वृद्धः—सच्चं, एदं कहं । (छाया-सत्यं एतत्कथम्)

तरुणः—अचरिअं खु एदं । (दामोदळदेहम्मि विळीणा ण दीसइ

चिन्तयन्त्याश्शरीरोपरि निपत्य रोदिति) (छाया-आश्चर्यं खल्वेतत्, दामोदरदेहे विलीना न दृश्यते)

वृद्धः—(गच्छन्तं कृष्णमवलोक्य) वच्छ, उट्ठेहि उट्ठेहि पेक्ख, दामोदळो चउब्भुओ दीसइ। (छाया-वत्स, उत्तिष्ठ, उत्तिष्ठ; पश्य, दामोदरश्चतुर्भुजो दृश्यते)

तरुणः—(उत्थाय) कहं ? चउब्भुओ। (छाया-कथं ? चतुर्भुजः) (उभावपि सरभसमुपसृत्य प्रणम्य-मरिसदु दमोदळो परुसभासिणं इमं जणं (छाया-मृष्यतु दामोदरः परुषभाषिणमिमं जनं)

दामोदरः—क्व चिन्तयन्ती ?

तरुणः—(सगद्गदं) तुमं अणुगदा। (छाया-त्वामनुगता)

दामोदरः—कथं, मामनुगता ?

वृद्धः—तुह अणुग्गहस्स जं होदव्वं तं आसि। (छाया-तवानुग्रहस्य यद्भवितव्यं, तदासीत्)

दामोदरः—भवतु, भवतु, साधु संस्कुरुतं तस्या मङ्गलभाजनं शरीरं।

तौ—जं आणवेदि। (निष्क्रान्तौ) (छाया-यदाज्ञापयति)

(प्रविश्य) नीलाम्बरः—वत्स, दामोदर,

दामोदरः—अये ? आर्यः, (साञ्जलिबन्धं) क्व गतोसि ?

नीलाम्बरः—मातुलनियोज्यस्समायातो रथेनाक्रूरः।

दामोदरः—अक्रूरः, किमर्थं ?

नीलाम्बरः—न जाने, क्व वासुदेवः, क्व वासुदेवः, इति पृच्छन्नागतः

दामोदरः क्वेदानीम् ?

नीलाम्बरः—अस्मद्गृहं प्रविष्टः।

दामोदरः—एहि, गच्छामः।

(निष्क्रान्तास्सर्वे)

(प्रथमोऽङ्कः)

(द्वितीयोऽङ्कः)

(ततः प्रविशति निजगृहारामस्था पुष्पापचयं नाटयन्ती राधा)

राधा—(कृष्णचरितबद्धं गीतं गायन्ती) ण रमणिज्जं एदं एदं खु रमणिज्जं ओचिणोमि। (तथा कृत्वा) किण्णु खु, मह पाणिफरिसं परिहरिअ एसो कसणभमरो अण्णदो गदो। (छाया—न रमणीयमेतत्, एतत्खलु रमणीयं, अपचिनोमि, किन्तु, खलु, मम पाणिस्पर्शं परिहृत्यैष कृष्णभ्रमरोऽन्यतो गतः)

(प्रविश्य) यमुना—हञ्ज, तुवर, तुवर। (छाया—हला, त्वरस्व त्वरस्व)

राधा—कुदो ? (छाया—कुतः)

यमुना—किं, ण जाणासि ? (छाया—किं न जानासि),

राधा—ण जाणामि, कहेहि। (छाया—न जानामि कथय)

यमुना—दामोदलो मं उज्झिअ कहिं वि ण चलइ त्ति भणिदं खु तुए। (छाया—दामोदरो मामुज्झित्वा कुत्रापि न चलतीति भणितं खलु त्वया)

राधा—आम, दाणिं वि भणामि। (छाया—आम, इदानीमपि भणामि)

यमुना—सो विस्संभभाअणं ण हि वंचओ त्ति भणिदं खु मए। (छाया—स विस्रम्भभाजनं न हि, वञ्चक इति भणितं खलु मया)

राधा—किं दाणिं ! (छाया—किमिदानीम्)

यमुना—ण किं वि अण्णं, सो पत्थिदो। (छाया—न किमप्यन्यत्, स प्रस्थितः)

राधा—कहिं ? (छाया—कुत्र)

यमुना—महुरं। (छाया—मथुराम्)

राधा—कहं ! (पुष्पभाजनं पातयति) (छाया—कथम्)

यमुना—किं एदं । (विकीर्णानि कुसुमान्यादाय भाजनं पूरयति) (छाया—किमेतत्)

राधा—हला, अवि सच्चं, केण भणिदं । (छाया—हला, अपि सत्यं केन भणितम्)

यमुना—किं अळिइं कहेमि, मए दिट्ठं, सव्वे वि इत्थिआजणो रहं पळिवळिअ चिट्ठइ । (छाया—किमलीकं कथयामि, मया दृष्टं, सर्वोऽपि स्त्रीजनो रथं परिवार्य तिष्ठति)

राधा—एहि दाव, (परिक्रम्य) कस्स रहो ? (छाया—एहि तावत्, कस्य रथः ?)

यमुना—कंसस्स । (छाया—कंसस्य)

राधा—कहं ? कंसस्स, केण आणीदो । (छाया—कथं कंसस्य, केनानीतः ?)

यमुना—अक्कूळेण । (छाया—अक्रूरेण)

(ततः प्रविशति नीलाम्बरद्वितीयो गोपीजनपरिवारिते रथे निषण्णो दामोदरः)

दामोदरः—मुञ्चत पन्थानम् ।

स्त्रीजनाः—दामोदळ, मा गच्छदु भवं । (सबाष्पमञ्जलिं बध्नन्ति) (छाया—दामोदर, मा गच्छतु भवान्)

राधा—(ससम्भ्रममुपसृत्य) णाह, किण्णु खु एदं । (छाया—नाथ, किन्नु खल्वेतत्)

दामोदरः—(बलरामस्य मुखमवलोक्य स्मयते)

नीलाम्बरः—अम्ब, प्रस्थितस्ते नाथो मधुराम् ।

राधा—(संस्कृतमाश्रित्य) नाथ, किमिदं, किमु दूरीकृतो व्याहारोऽपि ।

दामोदरः—(सस्मितं मुरलीं चुम्बन्नास्ते)

राधा—(सगद्गदं) कृष्ण, नाहं मुरली। (चमत्कारमाहत्य मुरलीमाच्छिद्य गृह्णाति)

अक्रूरः—दामोदर, किमिदं अतिक्रान्तो हि कालः।

दामोदरः—प्रेरय वाहान्।

अक्रूरः—(तथा करोति)

राधा—(खलीनं गृहीत्वा) केन कृतं ते नामधेयं "अक्रूर" इति।

(प्रविश्य) वनमाला—णाह, मए सव्वहा अवज्जिअकंठग्गहाए होदव्वं खु। (छाया—नाथ, मया सर्वथाऽपरित्यक्तकंठग्रहया भवितव्यं खलु,)

राधा—अनवरतमप्यविरहिता वर्तते किल वनमाला, (सबाष्पगद्गदं) न हि राधा।

वनमाला—दामोदल, गेह णोणीदं, संतोसेण समप्पेमि, मागच्छ महुरं। (छाया—दामोदर, गृहाण नवनीतं सन्तोषेण समर्पयामि, मा गच्छ मथुराम्)

यमुना—णाह, मा खु दाणिं तुह जमुणा ! (छाया—नाथ, मा खलु इदानीं यमुना)

राधा—हन्त, प्रलोभनं, प्रलोभनम्।

अक्रूरः—(सर्वा अपि बलात्किञ्चिदुत्सार्य वाहान्प्रेरयति)

राधा—(रथजिघृक्षया कतिचित्पदानि गत्वा मूर्छिता पतति)

गोप्यः—णाह, पीदंबल, दामोदल, किमु जुत्तं एव्वं कदुअ गमणं। (छाया—नाथ, पीताम्बर, दामोदर, किमु युक्तमेवं कृत्वा गमनं।)

दामोदरः—अक्रूर स्थापय रथं, समाश्वास्य यामः।

अक्रूरः—(तथा करोति)

दामोदरः—(रथादवरुह्य प्रतिनिवृत्य) राधे समाश्वसिहि ।

राधा—हन्त, प्रलोभनं, प्रलोभनम् ।

दामोदरः—(पाणिना परामृशति)

राधा—कथं, परिचित इव स्पर्शः (नेत्रमुन्मील्य) किन्तु खलु, स कृष्णः, दिष्ट्या, हन्त। (सहसोत्थाय) हला, यमुने आनय पुष्पभाजनम् ।

यमुना—(आनयति)

राधा—(अञ्जलिना कुसुममादाय कृष्णोपरि वर्षति)

दामोदरः—अलं वैक्लव्येन, पुनरागतमवेहि ।

राधा—हन्त भोः स एव सङ्कल्पः ।

दामोदरः—आम, राजाज्ञा खलु ।

राधा—(सगद्गदं) नैव स्मरति पक्कणजनं नागरिकः हन्त, ते प्रलोभनशीलता, कृष्ण, एतदर्थं किल प्रयाणोन्मुखप्राणां मां प्रतिबोधितवान् ।

दामोदरः—(सर्वा विलोक्य) अलं वैक्लव्येन, प्रार्थये गमनानुमतिम् ।

गोप्यः—दामोदल, तुए विरहिदे गोउळे कहं विअ वसामो ।
(छाया—दामोदर, त्वया विरहिते गोकुले कथमिव वसामः)

दामोदरः—मामिहस्थमवगच्छत । (रथमधिरोहति)

गोप्यः—(सनिर्वेदं निष्क्रान्ताः)

अक्रूरः—(वाहान्प्रेरयति)

नीलाम्बरः—अनिर्वचनीयं खलु मकरन्दस्य दुःखम् ।

अक्रूरः—गोपानां पुनः ।

दामोदरः—किं कुर्मः ?

नीलाम्बरः—अक्रूर,

प्रथूच्छूनककुत्स्फीतग्रीवो रोषारुणेक्षणः ।

प्रांशुस्तीक्ष्णविषाणोऽत्र हतोऽरिष्टोऽनुजन्मना ॥ १ ॥

अक्रूरः—(साञ्जलिबन्धम्) मधुरावासिनापि मया श्रुतमेवाद्भुतचारितस्य चरितम् ।

दामोदरः—वाजिनः प्रजविनः कुरु ।

अक्रूरः—(तथा करोति)

नीलाम्बरः—

श्वासोच्छ्वासांश्च बध्नन्नवटतलगतं स्यन्दनं स्वात्मलीनं
कुर्वन्पर्यन्तदेशं वलयवदधिकं भ्रामयन्पल्वलानि ।
अग्रेमार्गं प्रसन्वा हिमगलितमपि स्पष्टयन्दूरसंस्थं
दूरीकुर्वंश्च तन्द्रां मनसि वितनुते विस्मयं वेग एषः ॥ २ ॥

दामोदरः—एवमेवेदं प्रथमानुभवेन ।

नीलाम्बरः—

वातचालितपताकिकावलिः
शातकुम्भकलशातिशोभिता ।
शीतरश्मिविमलालयाकुला
भाति काप्यिदियमायता पुरी ॥ ३ ॥

अक्रूरः—इयमेव मधुरा ।

दामोदरः—कथं, मधुरा ?

अक्रूरः—अथ किं ।

दामोदरः—स्थापय रथम् ।

अक्रूरः—कुतः ?

दामोदरः—पदाती प्रविशावः

अक्रूरः—यथारोचते भवते । (रथं स्थापयति)

दामोदरः—प्रथममावेदय मातुलाय समायातावावाम् ।

अक्रूरः—तथा । (रथेन निष्क्रान्तः) (उभौ—परिक्रामतः)

नीलाम्बरः—अहो, रमणीयेयं मधुराया रथ्या।

दामोदरः—अभ्रंलिहशिखराणि निकेतनानि।

नीलाम्बरः—(नेपथ्याभिमुखमवलोक्य)—

आतपातिमसृणासिताङ्गकः
श्मश्रुजालपिहिताधरोऽसलः।
अंसयुग्मदृढबद्धपाण्डर
ग्रन्थिभारनतपृष्ठ एष कः॥ ४॥

दामोदरः—पृच्छामः। (परिक्रामति)

(ततः प्रविशति यथानिर्दिष्टो रजकः)

रजकः—अदिक्कंतो काळो, ता तुरिअं गच्छामि। (छाया—अतिक्रान्तः कालः, तस्मात्त्वरितं गच्छामि)

दामोदरः—(उपसृत्य) भोः, कस्त्वम्?

रजकः—(सामर्षं) ळे ळोअप्पसिद्धं मं को तुमं ति पुच्छसि। (छाया—रे लोकप्रसिद्धं मां कस्त्वमिति पृच्छसि)

दामोदरः—अलममर्षेण, नूतनोऽहमत्र।

रजकः—गच्छ ळे, किं तुह मह उत्तंतेण? (छाया—गच्छ रे, किं तव मम वृत्तान्तेन)

दामोदरः—विक्रेयमिदम्?

रजकः—ळे, किं एव्वं पुच्छसि, महळाअस्स ळजओहं। (छाया—रे किमेवं पृच्छसि, महाराजस्य रजकोऽहम्)

दामोदरः—किमु रजकः, महाराजः कः?

रजकः—किं तुमं उम्मत्तो? (छाया—किं त्वमुन्मत्तः)

दामोदरः—महाराजं ज्ञातुमिच्छामि।

रजकः—हुं, बाळो तुमं। (गन्तुमिच्छति) (छाया—हुं बालस्त्वम्)

दामोदरः—(अर्गलीभूय) अत एव पृच्छामि महाराजः कः,

रजकः—ळे, जो महाळाओ सो एळ, (छाया–रे, यो महाराजस्स एव)

नीलाम्बरः—तन्नाम,

दामोदरः—(सस्मितं) कथयति कथयति,

रजकः—(सक्रोधभ्रूभङ्गं) ळे मुंच मग्गं, (नुदति)–(छाया–रे मुञ्च मार्गम्)

दामोदरः—(अर्गलीभूय) कथय, कथय,

रजकः—ळे बाळो वि कसणो विअ परक्कमासि (सस्मितं) वच्छ मुञ्च मग्गं अदिक्कंतो काळो, (छाया–रे बालोऽपि कृष्ण इव पराक्रमसि, वत्स, मुञ्च मार्गं, अतिक्रान्तः कालः)

नीलाम्बरः—कृष्णः कः,

रजकः—किण्णु खु, ण जाणासि कसणं (छाया–किन्तु खलु, न जानासि कृष्णम्)

नीलाम्बरः—न जानामि,

रजकः—गोउळे वट्टइ, देण डिभत्तणम्मि माळिदा पूदणा, (छाया–गोकुले वर्तते, तेन डिम्भत्वे मारिता पूतना)

दामोदरः—कथं पूतना,

रजकः—सअडासुळो वि, (छाया–शकटासुरोऽपि)

दामोदरः—हन्त?

रजकः—दावमेत्तं ण हि, त्तिणवत्तो केसी, अळिट्ठो, धेणुओ अण्णो वि जो को, (छाया–तावन्मात्रं न हि, तृणावर्तः, केशी अरिष्टः, धेनुकः, अन्योऽपि यः कः)

दामोदरः—महदिदमाश्चर्यम्।

3

AM.

रजकः—तस्स जेट्ठभादा नीळंबळो वि परक्कमे कसणं सणुकुणइ, (छाया–तस्य ज्येष्ठभ्राता नीलाम्बरोऽपि पराक्रमे कृष्णमनुकरोति)

दामोदरः—तस्य भ्रातापि ?

रजकः—आम, तस्स मादुळेण अह्माणं महाळाएण धणूमहस वच्छळेण आणिअ ताणं दोह्णं अ माळणकए चाणूळमुट्ठिओ आ आदिट्ठाओ, (छाया–आम्, तस्य मातुलेनास्माकं महाराजेन धनुर्महोत्सवच्छलेनानीय तयोर्द्वयोश्च मारणकृते चाणूरमुष्टिकौ आदिष्टौ)

दामोदरः—किमिदानीमायाति ?

रजकः—अहइं अणेदुं अक्कूळो प्पासिदो, (छाया–अथकिं, आनेतुमक्रूरः प्रेषितः)

दामोदरः—किमस्माकमप्यस्ति प्रवेशः ?

रजकः—अहइं, ताणं णिजुद्धकए एक्को सहामंडवो काळिदो हंत-आदक्कंतो काळो, महूसवणिमित्तं महाळाअस्स समप्पणिज्जं अमुल्ळं एदं अंसुअं, (छाया–अथकिं, तयोर्नियुद्धकृते एकस्सभामण्डपः कारितः, हन्त, अतिक्रान्तः कालः महोत्सवनिमित्तं महाराजाय समर्पणीयममूल्यमेतदंशुकम्)

दामोदरः—तद्यावयोरप्यनुरूपं प्रदेह्यंशुकं सभाप्रवेशाय,

रजकः—(सामर्षं) ळे पुणो वि एळं मा भण, अणुरूवं फळं अणुहविस्ससि, (छाया—रे पुनरपि एवं मा भण, अनुरूपं फलमनुभविष्यसि)

दामोदरः—भवतु, भवतु, देहि तावत्,

रजकः—मुंच ळे मग्गं, (कृष्णं परिनुदति) (छाया–मुञ्च रे मार्गं)

(नीलाम्बरः—सस्मितं वस्त्रभारमधः पातयति)

रजकः——ळे, मं ण जाणासि, (चपोटिकां ददाति) छाया—रे मां न जानासि)

दामोदरः——जानामि त्वाम् । (मुष्ट्या वक्षसि प्रहरति)

(रजकः—गतप्राणः पतति) (उभौ—स्वानुगुणमंशुकमादायात्मानमलङ्कृत्य परिक्रामतः)

नीलाम्बरः——

क्रमेलकशेरुका खुरणसा नमज्जत्रुका
मलाविलचलद्रदा प्रसृतपार्श्वकोचावटुः ।
अरालकरभा चलत्पृथुलभुग्नगुल्फाञ्चला ।
पतद्गूहकरा नता चरति कास्विदेषा पथि ॥ ५ ॥

दामोदरः—पृच्छामस्तावदेनामपि । (परिक्रामति)

(ततः प्रविशति यथानिर्दिष्टा कुब्जा)

कुब्जा—तुरिअं गन्दव्वं किं करिस्सं ण प्पच्चळइ अंग्घी ।
(छाया—त्वरितं गन्तव्यं किं करिष्यामि, न प्रचलत्यङ्घ्रिः ।)
(दामोदरः—उपसृत्य हसति)

कुब्जा—वच्छ, कुदो हससि । (छाया—वत्स, कुतो हससि)

दामोदरः—मनोहराङ्गीति ।

कुब्जा—ण हि किं हं रमणिज्जा । (छाया—न हि किमहं रमणीया ?)

दामोदरः—उक्तं हि । त्वां ज्ञातुमिच्छामि ।

कुब्जा—(सस्मितं) किं एदं वि भणिदव्वं, इत्थिआ खु हं ।
(छाया—किमेतदपि भणितव्यं, स्त्री खल्वहम् ।)

दामोदरः—ज्ञातमिदानीम् ।

नीलाम्बरः—तव नामधेयम् ।

कुब्जा—मह सरीरं एव्व भणादि । (छाया—मम शरीरमेव भणति ।

दामोदरः—भवतु, नर्मज्ञासि, त्वरितगामिनी क्व प्रस्थिता ?

कुब्जा—किं तुमं एव्व तुरिअगमणो, पेक्खह्म । मए सह धावदु दाव भवं । (छाया—किं त्वमेव त्वरितगमनः ? पश्यामः । मया सह धावतु तावद्भवान् ।)

दामोदरः—(बद्धपरिकरः) प्रधावतु भवती ।

कुब्जा—(तुमं वि । (छाया—त्वमपि ।)

दामोदरः—भवतु । (सज्जस्तिष्ठति)

कुब्जा—(क्रमेलकवत्परिधाव्य परावृत्य) वंचओ सि (छाया वञ्चकोऽसि ।)

दामोदरः—(सस्मितं) नाहं समर्थः ।

नीलाम्बरः—अहं धावामि, प्रधावतु भवती । (सज्जस्तिष्ठति)

कुब्जा—मा खु मा खु । (छाया—मा खलु मा खलु ।)

दामोदरः—(उपसृत्य) क्व प्रस्थिता ?

कुब्जा—वट्टइ खु । (स्वोदरं परामृशति) (छाया—वर्तते खलु)

दामोदरः—न हि ते प्रियः ?

कुब्जा—वट्टइ, सो मह प्पिओ, हं उण तस्स अप्पिआ जादा । (छाया—वर्तते, स मम प्रियः । अहं पुनस्तस्याप्रिया जाता ।)

दामोदरः—कुतः ?

कुब्जा—हं अरमणिज्जा त्ति पलिच्चत्ता । (छाया—अहमरमणीयेति परित्यक्ता ।)

नीलाम्बरः—स तु सुन्दरो भवेत् ?

कुब्जा—अहइं सुणोदु—

बळिळो तुंदी खुज्जो
जळसिच्चंगालवण्णओ विग्गो ।
बहिलो मुण्डो खोडो
वट्टइ मह वळ्ळहो दूहें ॥ ६ ॥

(छाया—अथकिं शृणोतु—वलिरस्तुन्दी कुब्जो जलसिक्ता-ङ्गारवर्णको विग्रः । बधिरो मुण्डः, खोडो वर्तते मम वल्लभो दूरे ।)

दामोदरः—दिष्ट्या सङ्घटनमिदम् ।

कुब्जा—देण पळिच्चत्ता उअळकए महाळाअस्स घुसिणकम्मं कुणन्ती वट्टामि, को तुमं ? (छाया—तेन परित्यक्ता उदरकृते महाराजस्य घुसृणकर्म कुर्वती वर्ते । कस्त्वम् ?

दामोदरः—कथं जानासि ?

कुब्जा—पुरिसोत्तमं जाणामि । (छाया—पुरुषोत्तमं जानामि ।)

दामोदरः—बालोऽहम् ।

कुब्जा—होदु, होदु, वामणो को ? (छाया—भवतु, भवतु, वामनः कः ?

दामोदरः—स तु पुरुषोत्तमः ।

कुब्जा—तुमं वि ॥ (छाया—त्वमपि ।)

दामोदरः—तर्हि ममापि याञ्चाधिकारः ।

कुब्जा—हं इथ्थिआ जण्णाहिआरो ण हि, किं जाचासि ? (छाया—अहं स्त्री, यज्ञाधिकारो न हि, किं याचसे ?

दामोदरः—त्वयि यदस्ति ।

कुब्जा—घुसिणं अत्थि (छाया—घुसृणमस्ति ।)

दामोदरः—देहि तदेव।

कुब्जा—मं वि बलिं विअ पादाळं णेसि किं? (छाया—मामपि बलिमिव पातालं नयसि किम्?

दामोदरः—त्वामुद्धरामि।

कुब्जा—ता गेह्ण। (ददाति) (छाया—तर्हि गृहाण।)

दामोदरः—(बलरामायार्पयित्वात्मानमलङ्कृत्य) कथमस्ति!

कुब्जा—कामजणओ विअ दिट्ठिजुअळेण णाळं तुमं दट्ठुं मं उद्धळ। (छाया—कामजनक इव, दृष्टियुगलेन नालं त्वां द्रष्टुं, मामुद्धर।) (दामोदरः—तथा करोति।)

कुब्जा—(संस्कृतमाश्रित्य)—

सौन्दर्यं सौकुमार्यञ्च लावण्यं प्रांशुतात्मनः।
हन्त दिष्ट्या मया नाथ स्वप्नेप्येवं न चिन्तितम्॥ ७॥

(सविभ्रमं) अस्मद्गृहमलङ्करोतु स्वामी, धन्या भवेयम्।

दामोदरः—(सस्मितं) भवतु प्रकृतकार्यानन्तरम्।

सुन्दरी—इतोऽपि प्रकृतकार्यं किम्?

दामोदरः—महाराजस्य धनुर्महोत्सवः।

सुन्दरी—स तु वञ्चनाव्यापारैकतानः। जागरूकेण भवता भवितव्यम्।

दामोदरः—स्यान्नाम। पश्यामः। गच्छतु भवती।

सुन्दरी—मङ्गलं ते भूयात्। (सविभ्रमं निष्क्रान्ता)

दामोदरः—(नेपथ्याभिमुखमवलोक्य) आर्य, अयं मालाकारः, पश्यत्वार्यः—

पुष्पादानं भाजनाद्वृन्तसूत्र-
ग्रन्थ्याधानं कश्च शक्नोति वेत्तुम्।

शश्वत्पाणिर्नृत्यतीवास्य चित्रं
रम्यं माल्यं दृश्यते माययेव॥ ८ ॥

अस्मद्भक्ताग्रेसरोऽयं, आर्य, विनोदेन कञ्चित्कालमतिवाहयामः ।

नीलाम्बरः—यथा रोचते भवते ।

दामोदरः—अद्य वृद्धेभ्यभूमिकां परिगृह्य माल्यक्रीणनाय प्रविशत्वार्यः ।

नीलाम्बरः—कथं भवान् ?

दामोदरः—अहं तु प्रविशामि कसदूतभूमिकया (उभौ-तथाभूत्वा परिक्रामतः ।)

(ततः प्रविशति यथानिर्दिष्टो मालाकारः ।)

मालाकारः—इतस्तावत् ।

प्रविश्य भार्या—आणवेदु (छाया—आज्ञापयतु ।)

मालाकारः—अपि सज्जं ?

भार्या—अहइं गोमएण सोहिदं क्खिदिदळं, णाअवळ्ळीए अळंकिदं अ (छाया—अथकिं गोमयेन शोधितं क्षितितलं नागवल्ल्या अलङ्कृतञ्च ।)

मालाकारः—दीपिकास्तम्भद्वयं पुनः ?

भार्या—भद्दासणस्स पुळदो णिक्खित्तं हेअङ्गवीणेण पूळिदं अ । (छाया—भद्रासनस्य पुरतो निक्षिप्तं हैयङ्गवीनेन पूरितञ्च ।)

मालाकारः—गृहाण, अलङ्कुरु भद्रासनम् । (पुष्पमालास्समर्पयति ।)

(भार्या—आदाय निष्क्रान्ता ।)

मालाकारः—सन्निहितेव भगवदागमनवेळा, धन्यो भवेयम् ।

धनी—(उपसृत्य) कियदस्य ?

मालाकारः—अमूल्यमेतत् ।

धनी—तर्हि, तूष्णीं दीयते ?

मालाकारः—न हि, न हि,

धनी—दीयतां मूल्याय।

मालाकारः—अद्य नापि विक्रीयते।

धनी—कुतः ?

मालाकारः—आयाति भगवान्।

धनी—भगवान्कः ?

मालाकारः—वासुदेवः।

धनी—आयातु नाम।

मालाकारः—सर्वमिदं तस्मै।

धनी—सन्ति किल बहूनि माल्यानि।

मालाकारः—उक्तं हि सर्वमपीति।

धनी—दीयतामेकं, दास्यामि द्विगुणतरं मूल्यम्।

मालाकारः—(सस्मितं) पुरस्स्थापितेऽपि मेरौ न दास्यामि दल-मेकमपि।

धनी—मयापि भगवते नीयते।

मालाकारः—(साञ्जलिबन्धं) गन्तुमर्हति भवान्।

कंसदूतः—(उपसृत्य) किमिदम् ?

मालाकारः—न किमपि।

दूतः—(सरोषं) न किमपि, राज्ञा तावद्भवदागमनं प्रतिपालनी-यम्।

मालाकारः—राजा कः ?

दूतः—उन्मत्तस्संवृत्तोऽसि।

मालाकारः—(सास्मितं) तथैव भवतु।

दूतः—किन्तु खलु भवतु तथैव, दण्ड्योऽसि।

मालाकारः—पश्यामः को वेति।

दूतः—गच्छ रे माल्यमादाय प्रासादम्।

मालाकारः—अस्मद्गृहमेव प्रासादः।

दूतः—हन्त, भवद्गृहं प्रासादः ?

मालाकारः—अथकिं वासुदेवस्येदम्।

दूतः—अङ्ग मुधा जहासि जीविकाम्।

मालाकारः—(सस्मितं) हुं तृणीकृतजीवितस्य मे किं तया ?

दूतः—इमानि तावत्कस्मै ?

मालाकारः—भगवते वासुदेवाय।

दूतः—हन्त वध्याय सत्कारः।

मालाकारः—(सबाष्पगद्गदं) शान्तंपापं, शान्तंपापम्।

(प्रविश्य) पुत्रः—तात, तौ नायातौ, शून्येन रथेनाक्रूरः प्रविष्टः सौधम्।

मालाकारः—(सावेगं) पाप, अस्मन्मनोरथेनेति ब्रूहि (सनिर्वेदं) अपि सत्यं सम्यगवलोकितम्।

पुत्रः—किमलीकं कथयेयम् ?

मालाकारः—न पृष्टः किमक्रूरः ?

पुत्रः—न हि।

मालाकारः—(दीर्घं निश्वस्य) हुं न हि, न हि।

दूतः—स तु महाराजभीत्या तत्रैव भवेत्।

मालाकारः—कथं, महाराजाद्भीतिः स तु भयापहो हि।

दूतः—उत्तिष्ठ, आयाहि, समर्पय राज्ञे।

मालाकारः—हन्त महाराजाद्भीतिः नाथ, आश्रितानामभयाय खलु भवदवतारः।

दूतः—किमु न श्रुतम् ।

मालाकारः—तात किमुक्तम् ?

दूतः—उत्तिष्ठ आयाहि समर्पय राज्ञे ।

मालाकारः—मास्तु, मास्तु, भगवते सङ्कल्पितम् ।

दूतः—अरे स तु दूरे ।

मालाकारः—भक्त्या मनसैव समर्पयामि अङ्गीकरोति भगवान् अलङ्कारप्रियो हि ।

धनी—स तु नागतः देहि माल्यमेकम् ।

मालाकारः—कथं नागतः ? (सबाष्पगद्गदं) भगवन् भक्तवत्सलो हि भवान् । क लीनमिदानीं तद्वात्सल्यम् ।

गजेन्द्रो ग्राहार्तः कमलमपचित्योद्धृतकरः
नितान्तं तान्तात्मा सरसि निजयत्नं शिथिलयन् ।
गृहाणेदं स्वामिन्निति चिरमरोदीत्करुणया
तदादातुं दूरान्न किमु गरुडेन त्वमगमः ॥ ९ ॥

अहमपि भवग्राहार्तः चिराद्रोदिमि, आयाहि, माल्यमिदमङ्गीकुरु, (सनिर्वेदं) हुं, कथं पापीयांसमुपगच्छति ? (सबाष्पं) नूनं नूनं, पापियानहं, किन्तु खलु पापापहो हि भगवान् आयाति, अनुगृह्णाति मां, (सोन्मादहासं) एह्येहि, कथमौदास्यं ? नोचितमिदम्, नाथ क गतं कारुण्यम् ? अहमेव खलु पात्रं तव कारुण्यस्य । (समन्तादवलोक्य सवैलक्ष्यं) किन्नु खलु न हि दृश्यते ?

(ससम्भ्रमं प्रविश्य) भार्या—अज्ज तुवर तुवर (छाया-आर्य त्वरस्व त्वरस्व)

मालाकारः—कुतः ?

भार्या—पुप्फासणे वासुदेवो बलदेवोऽवि (छाया-पुष्पासने वासुदेवो बलदेवोऽपि ।)

मालाकारः—कथं, वासुदेवः ? अस्मत्स्वामी वासुदेवः, बलभद्रोऽपि भगवदग्रजः, हन्त, भद्रमस्तु भद्रमस्तु । (सहसोत्प्लुत्य परिक्रामति ।)

(ततः प्रविशतः पुष्पासनोपविष्टौ नीलाम्बरपीताम्बरौ ।)

पीताम्बरः—(समन्दस्मितं) आर्य कथं वर्तते मालाकारः ।

नीलाम्बरः—किं कथयेयम्,

मालाकारः—(सरभसमुपसृत्य) देवदेव, (प्रणम्योत्थाय साञ्जलिबन्धं)

भगवानयं हि वसुदेवसम्भवो
भवसागरान्तरसक्तुज्जनेर्मम ।
भवनं कृपैकवसतिस्समेयिवा-
नहमेव हन्त सुकृती शरीरिणाम् ॥ ९ ॥

(नृत्यति)

भार्या—समप्पेदु अज्जो माळं । (छाया—समर्पयत्वार्यो मालाम् ।)

मालाकारः—इदमहं समर्पयामि । (मालामादाय) भगवन् भक्तवत्सल, अवाप्तसमस्तकामो हि भवान् ।

दामोदरः—अमूल्यं किल माल्यमिदं, देहि देहि तावत् ।

मालाकारः—(उभावपि माल्यैरलङ्कृत्य) हन्त भोः, मया समर्पितमप्यङ्गीकृतं भगवता । धन्योऽस्मि । धन्योऽस्मि (सप्रदक्षिणं प्रणम्योत्थाय) वत्स, विस्तारय लोचने, सहधर्मचारिणि, विस्तारय लोचने,—

अनेकपरिवत्सरं नियमतस्तपश्चर्यया
सुधीरपि विलोकयेन्नवपयोदमेनं न वा ।

कृपामृतभरात्स्वयं सविधमागतं सादरं
विलोकय विलोकयामृतरसप्रदानोन्मुखम् ॥ १० ॥

(सभक्ति निर्वर्ण्य) हन्त भोः, शेषशायी चतुर्भुजो भगवान्पुण्डरीकाक्षः,। नमोस्तु ते हन्त मास्तु अस्माकं दृष्टिदोषः। भद्रमस्तु ते। (साञ्जलिबन्धं तिष्ठति।)

दामोदरः—तात, सन्तुष्टोस्मि ते भक्त्या।

मालाकारः—कृतकृत्योस्मि।

दामोदरः—दातुमिच्छामि, यदभिमतं ते।

मालाकारः—भगवन्, अखिलमपि भवदीयं खलु।

दामोदरः—अहो, ते निस्पृहता। दत्तमस्मत्पदम्।

मालाकारः—(सहर्षगद्गदं) कथं मुक्तोऽहम्?

दामोदरः—न केवलं भवान् भवद्वंश्या अपि।

मालाकारः—कथं तेऽपि मुक्ताः? (पुत्रमालिङ्ग्य) वत्स मुक्तोऽसि, प्रिये मुक्तासि, (सोन्मादहासं) हन्त, सर्वे मुक्ताः (निजोद्गमनीयमुत्पात्य नृत्यति।)

दामोदरः—किं ते भूयः प्रियमुपहरामि?

मालाकारः—नाथ, भवत्पादारविन्ददास्यादपि किमस्ति प्रियमन्यत्? तथापीदमस्तु।

(भरतवाक्यं)

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक्पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैस्सम्भृताः
सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः ॥ ११ ॥

(निष्क्रान्तास्सर्वे)

(द्वितीयोऽङ्कः)

इति श्रीबालधन्वि जग्गूवकुलभूषण कविविरचितं अमूल्यमाल्यं सम्पूर्णम्।

शुभमस्तु